यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे दुर्लक्ष्ये प्रयुज्यते न चायं कस्मिंश्चिद्रूढः। या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभाषिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते। नच क्रमसामान्यात् समानार्थप्रतिपत्तिर्भवति तद्रूपप्रत्यभिज्ञाने। न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। प्रकरणनिरूपणायान्त्र न परकल्पितं प्रधानं प्रतीयते शरीररूपकविन्यस्तगृहीतेः। शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते कुतः? प्रकरणात् परिशेषतश्च। तथाहि अनन्तरातीतो ग्रन्थः आत्मशरीरादीनां रथिरथादिरूपकक्लृप्तिं दर्शयति। “आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः” इति शेषे च “इन्द्रियादिभिरसंयतैः संसारमधिगच्छति। संयतैस्त्वध्वनः पारन्तद्विष्णोः परमं पदमवाप्नोतीति” दर्शयित्वा किं तदध्वनः पारम्परमम्पदमित्यस्यामाकाङ्क्षायान्तेभ्यएव प्रकृतेभ्य इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परम्पदं दर्शयति। “इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरिति”। तत्र यएवेन्द्रियादयः पूर्व्वस्यां रूपककल्पनायामश्वादिभावेन प्रकृताः त एवेह परिगृह्यन्ते प्रकृतप्रक्रियाऽपरिहाराय। तत्रेन्द्रियमनोबुद्धयस्तावत् पूर्व्वत्रेह च समानशब्दा एव अर्थास्तु ये शब्दादयो विषया इन्द्रियहयगोचरत्वेन निर्द्दिष्टास्तेषाञ्चेन्द्रियेभ्यः परत्वम् इन्द्रियाणाञ्च ग्रहत्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धेः। विषयेभ्यश्च मनसः परत्वं मनोमूलत्वाद्विषयेन्द्रियव्यवहारस्य। मनसस्तु परा बुद्धिः, बुद्धिं ह्यारुह्य भोग्यजातं भोक्तारमुपसर्पति। बुद्धेरात्मा महान् परः यः सः आत्मानं रथिनं विद्धीति रथित्वेनोपक्षिप्तः कुतः? आत्मशब्दात्। भोक्तुश्च भोगोपकरणात् परत्वोपपत्तेः। महत्त्वञ्चास्य स्वामित्वादुपपन्नम्”। “तदेवं पूर्व्वापरालोचनायां नास्त्यत्र परकल्पितस्य प्रधानस्यावकाशः” भा०। “सूक्ष्मन्तु तदर्हत्वात्” सू० “उक्तमेतत् प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधानमिति। इदमिदानीमाशङ्क्यते कथमव्यक्तशब्दार्हत्वं शरीरस्य, यावता स्थूलत्वात् स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हमस्पष्टवचनस्त्वव्यक्तशब्द इति अतउत्तरमुच्यते “सूक्ष्मन्त्विह” कारणात्मना शरीरं विवक्ष्यते सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति तथापि तस्य त्वारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति प्रकृतिशब्दश्च विकारे दृष्टः यथा “गोभिः श्रीणीत मत्सरमिति”। तथाच श्रुतिः “तद्धेदं तर्ह्यव्याकृतमासीदिति” इदमेव व्याकृतं नामरूपविभिन्नं जगत्प्रागवस्थायां परित्यक्तव्याकृतनामरूपं वीजशक्त्यवस्थमव्यक्तशब्दयोग्यन्दर्शयति” भा०। परमब्रह्मपरत्वे “ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः” “क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्” इति च गीता। “योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः” मनुः विष्णौ तु “अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः सनातनः” इति विष्णुस०। अप्रकाशितार्थे “तमशेषमस्याव्यक्तव्यवहारसूचितमर्थं मनसा जग्राह” काद० “ततः स्वयम्भूर्भगवानव्यक्तं व्यञ्जयन्निदम्” मनुः संख्याविशेषेणानवगते गणितशास्त्रोक्ते १० राशिभेदे तच्च वीजनाम्ना व्यवह्रियते “उत्पादकं यत् प्रवदन्ति बुद्धेरधिष्ठितं सत् पुरुषेण सांख्याः। व्यक्तस्य कृत्स्नस्य तदेकवीजमव्यक्तमीशं गणितञ्च वन्दे। पूर्व्वं प्रोक्तं व्यक्तमव्यक्तवीजं प्रायप्रश्ना नो विनाऽव्यक्तयुक्त्या” इत्युपक्रम्य “यावत्तावत्कालकोनीलकोऽन्यः वर्णः पीतो लोहितश्चैतदाद्याः। अव्यक्तानां कल्पिता मानसंज्ञास्तत्संख्यानं कर्त्तुमाचार्य्यवर्य्यैः” वीजग०। तच्च चतुर्विधं यथोक्तम् तत्रैव “यावत्तावत्कल्प्यमव्यक्तराशेर्मानं तस्मिन् कुर्व्वतो दिष्टमेव। तुल्यौ पक्षौ साधनीयौ प्रयत्नात्त्यक्त्वा क्षिप्त्वा वापि सङ्गुण्य भक्त्वा। एकाऽव्यक्तं शोधयेदन्यपक्षाद्रूपाण्यन्यस्येतरस्माच्च पक्षात्। शेषाव्यक्तेनोद्धरेद्रूपशेषं व्यक्तं मानं जायतेऽव्यक्तराशेः। अव्यक्तानां द्व्यादिकानामपीह यावत्तावद्द्व्यादिनिघ्नं हृतं वा। युक्तोनं वा कल्पयेदात्मबुद्ध्या मानं क्वापि व्यक्तमेवं विदित्वा। तत्र प्रथममेकवर्णसमीकरणं द्वितीयमनेकवर्णसमीकरणं वीजम्। यत्र वर्णस्य द्वयोर्वा बहूनां वा वर्गादिगतानां समीकरणं तन्मध्यमाहरणम्। यत्र भावितस्य तद्भावितमिति वीजचतुष्टयं वदन्त्याचार्य्याः। तत्र प्रथमं तावदुच्यते पृच्छकेन पृष्टे सत्युदाहरणे योऽव्यक्तराशिस्तस्य मानं यावत्तावदेकं द्व्यादिं वा प्रकल्प्य तस्मिन्नव्यक्तराशौ उद्देशकालापवत्सर्व्वं गुणनभजनत्रैराशिकपञ्चराशिकश्रेढीफलच्छेत्रव्यवहारादिगणनेन कार्य्यम्। तथा कुर्व्वता द्वौ पक्षौ प्रयत्नेन समौ कार्य्यौ। यद्यालापे समौ पक्षौ न स्तः।